देवपथः, पुं, (देवानां पन्थाः । "ऋक्पूरब्धूः पथामानक्षे । ५ । ४ । ७४ । इति अः ।) देवानां पन्थाः । तत्पर्य्यायः । छायापथः २ सोमधारा ३ नभःसरित् ४ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । १४८ । २० ।
"दिव्यो देवपथो ह्येष नात्र गच्छन्ति मानुषाः ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । ४५ ।
"ततो देवपथं गत्वा नियतो नियताशनः ।
देवसत्रस्य यत् पुण्यं तदवाप्नोति मानवः ॥")

देवपर्णं क्ली, (देवानां प्रियं पर्णमस्य ।) सुरपर्णम् । इति राजनिर्घण्टः ॥

देवपुत्रिका, स्त्री, (देवानां पुत्रिकेव प्रियत्वात् ।) एला । इति राजनिर्घण्टः ॥

देवपुत्री, स्त्री, (देवानां पुत्रीव प्रियत्वात् ।) एला । इति जटाधरः ॥

देवपूः, [र्] स्त्री, (देवानां पूः पुरी ।) अमरावती । इति जटाधरः ॥

देवप्रश्नः, पुं, (देवानां ग्रहदेवतानां प्रश्नः ।) ग्रहनक्षत्रादिघटितजिज्ञासा । तत्पर्य्यायः । उपश्रुतिः २ । इति हेमचन्द्रः । २ । १७७ ॥

देवप्रियः, पुं, (देवानां प्रियः ।) पीतभृङ्गराजः । वकपुष्पः । इति राजनिर्घण्टः ॥

देवबला, स्त्री, (देवप्रिया बला ।) सहदेवी । त्रायमाणा । इति राजनिर्घण्टः ॥

देवब्रह्मा, [न्] पुं, (देवेषु ब्रह्मा इव । देवर्षित्वादस्य तथात्वम् ।) नारदमुनिः । इति हेमचन्द्रः । ३ । ५१३ ॥

देवभवनं, क्ली, (देवानां भवनं गृहमिव । देवानां आश्रयत्वादस्य तथात्वम् ।) अश्वत्थः । इति शब्दचन्द्रिका ॥ स्वर्गः ॥ (देवप्रतिमा-निकेतनञ्च ॥)

देवभूः, पुं, (देवं देवत्वं भवति प्राप्नोतीति । भू प्राप्तौ + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (देवानां भूर्निवासभूमिरुत्पत्तिर्वा यत्र ।) स्वर्गश्च ॥

देवभूतिः, स्त्री, (देवात् देवलोकात् भूतिरुत्पत्तिर्यस्याः ।) मन्दाकिनी । इति शब्दरत्नावली ॥ (देवानां भूतिरिति विग्रहे । देवैश्वर्य्यम् ॥)

देवभूयं, क्ली, (देवस्य भावः । भू+"भुवो भावे।" ३ । १ । १०७ । इति क्यप् ।) देवत्वम् । देवसायुज्यम् । इत्यमरः । २ । ७ । ५२ ।

देवमणिः, पुं, (देवेषु मणिरिव ।) भर्गः । (देवोद्योतनशीलो मणिः ।) कौस्तुभः । अश्वरोमावर्त्तः । इति मेदिनी । णे, ६७ ॥ (यथा, शिशुपालवधे । ५ । ४ ।
"आवर्त्तिनः शुभफलप्रदशुक्तियुक्ताः
सम्पन्नदेवमणयो भृतरन्ध्रभागाः ।
अश्वाः प्थुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः ॥")
महामेदा । इति राजनिर्घण्टः ॥

देवमाता, [ऋ] स्त्री, (देवानां माता ।) अदितिः । इति त्रिकाण्डशेषः ॥ (यथा, भागवते ।३।१।३३।
"कच्चिच्छिवं देवकभोजपुत्र्या
विष्णुप्रजाया इव देवमातुः ॥"
देवमातृमात्रम् । यथा, महाभारते ।१३।१४।३८।
"देवपत्न्यो देवकन्या देवमातर एव च ॥")

देवमातृकः, त्रि, (देवो वृष्टिर्मातेव शस्योत्पादनेन पालकत्वात् जननीव यस्य । कप् ।) वृष्ट्यम्बुसम्पन्नव्रीहिपालितदेशः । इत्यमरः ।२।१।१२॥ (यथा, महाभारते । २ । ५ । ७८ ।
"कच्चिद्राष्ट्रे तड़ागानि पूर्णानि च वृहन्ति च ।
भागशो विनिविष्टानि न कृषिर्देवमातृका ॥")

देवमानकः, पुं, (देवेषु मानो यस्य । कप् । संज्ञायां कन् वा ।) कौस्तुभमणिः । इति शब्दरत्नावली ॥

देवमासः, पुं, (देवाय भ्रूणस्य क्रीड़नाय यो मासः। अत्र हि सुतेरोजसश्च प्रादुर्भावात् गर्भस्य क्रीड़नादित्वात् तथात्वम् ।) गर्भस्याष्टममासः । तत्पर्य्यायः । गर्भाष्टमः२ । इति त्रिकाण्डशेषः ॥ देवानां मासः । स मनुष्यमाने त्रिंशद्वर्षात्मकः ॥

देवयजिः, पुं, (देवान् यजते इति । यज+"सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) देवपूजकः । मुनिः । यथा, भट्टिः । २ । ३४ ।
"अह्नो द्विजान् देवयजीन् निहन्मः ॥"

देवयज्ञः, पुं, (देवानां यज्ञः ।) होमः । इति हेमचन्द्रः । ३ । ४८५ ॥ (यथा, मनुः । ४ । २१ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ॥")

देवयात्रा, स्त्री, (देवानां यात्रा ।) देवगमनम् । तत्पर्य्यायः । देवद्रोणी २ । इति हारावली । १२६ ॥ देवोत्सवादि ॥ (यथा, कथासरित्सागरे । २५ । १२१ ।
"एकदा देवयात्रायां तत्र मल्लसमागमे ।
आगादेको महामल्लः ख्यातिमान् दक्षिणापथात् ॥")

देवयानं, क्ली, (देवानां यानम् ।) देवविमानम् । देवरथः । इति शब्दार्थकल्पतरुः ॥ (त्रि, देवप्रापनीयम् । यथा, ऋग्वेदे । १ । १६२ । ४ ।
"यद्धविष्यमृतुशो देवयानं
त्रिर्मानुषा पर्य्यश्वं नयन्ति ॥"
देवप्रापकम् । यथा, तत्रैव । ७ । ७६ । २ ।
"प्र मे पन्था देवयाना अदृश्र-
न्नमर्द्धन्तो वसुभिरिष्कृतासः ॥")

देवयानी, स्त्री, शुक्राचार्य्यकन्या । सा ययातिराजपत्नी । इति श्रीभागवतम् ॥ (पुरा किल वृहस्पतिपुत्त्रः कचो देवकार्य्यार्थं सञ्जीवनविद्यार्थी असुरगुरुमुपागमत् । देवयानीयं तं युवानं मनोहरमवलोक्य तेन सङ्गता भवितुमियेष । कचस्तु गुरुकन्यामेनां ज्ञात्वा पाणिमस्या ग्रहीतुं न स्वीचकार । अस्मादेवासौ देवयानी प्राप्तविद्यं तं "न ते विद्या सिद्धिमेषा गमिष्यति" इति शशाप । कचस्तु निरपराधोऽपि शापाहतः क्रुद्धश्च "ऋषिपुत्त्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति" इत्येनां शप्तवान् । अयमेवास्या ब्राह्मणकन्याया अपि क्षत्त्रियपत्नीत्वे हेतुः ।
अथ कदाचित् क्रीड़न्तीनां कन्यानां वस्त्रवैपरीत्यं जातम् । देवयानी स्वीयवस्त्रग्रहणेन वृषपर्व्वणोऽसुरराजस्य सुतां शर्म्मिष्ठां चुक्रोश । शर्म्मिष्ठा तु तदसहमाना तां कूपमध्ये प्राक्षिपत् । अथ गच्छति काले ययातिर्मृगयां गतस्तृषार्त्तो जलमन्विष्यन् तत्रैव कूपसमीपमागत्य देवयानीं तन्मध्यस्थां दृष्ट्वा तस्या दक्षिणं पाणिं गृहीत्वा उत्थापयामास । अथ देवयानी कूपात् मुक्ता पितृसमीपमागत्य सर्व्वं विज्ञापितवती । अथ शुक्रे क्रोधादसुरराज्यात् गन्तुमुद्यते वृषपर्व्वासुरराजः स्वीयकन्यां शर्म्मिष्ठां कन्यासहस्रपरिवृतां परिचारकत्वेन प्रदाय स्वगुरुं देवयानीञ्च प्रसादयामास । अथ कदाचित् देवयानी पितृशुश्रूया नाहुषं ययातिं पतित्वेन स्वीकृत्य तेन सह विजहार । अस्याः पुत्त्रौ द्वौ यदुस्तुर्व्वसुश्च । गच्छति काले देवयानी राज्ञा सह वनं गत्वा चीनपरान् कुमारान् क्रीड़तस्तत्र दृष्ट्वा नृपौरसात् शर्म्मिष्ठागर्भे जातांश्च तान् विज्ञाय क्रोधपरवशा पितृसमीपं प्रस्थितवती । शुक्रस्तु दुहितरमवमानितां विदित्वा राजानं जरया योजयामास ॥ एतद्विशेषविवरणविस्तृतिस्तु महाभारते । १।७६-८३ । अध्यायेषु ज्ञातव्या ॥)

देवयुः, त्रि, (देवं याति उपास्यत्वेन प्राप्नोतीति । या+"मृगयादयश्च।" उणां ।१।३८ इति कुः ।) धार्म्मिकः । (यथा, ऋग्वेदे । १ । १५४ । ५ ।
"तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति ॥"
"देवयवो देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तो नरः ।" इति तद्भाष्ये सायनः ॥) लोकयात्रिकः । इति मेदिनी । ये,८६॥ देवे,पुं । इति शब्दरत्नावली ॥

देवयोनिः, पुं, स्त्री, देव एव योनिर्निदानभूतो यस्य सः । तद्यथा, विद्याधराः१ अप्सरसः २ यक्षाः ३ राक्षसाः ४ गन्धर्व्वाः ५ किन्नराः ६ पिशाचाः ७ गुह्यकाः ८ सिद्धाः ९ भूतगणः १० । इत्यमरः । १ । १ । ११ ॥ (देवानां योनिः । देवस्थानम् । यथा, महाभारते । ३ । ११४ । २८ ।
"अन्यथा हि कुरुश्रेष्ठ ! देवयोनिरपांपतिः ।
कुशाग्रेणापि कौन्तेय ! न स्प्रष्टव्यो महोदधिः॥")

देवरः, पुं, (दीव्यत्यनेनेति । दिवु क्रीड़ायाम् + "अर्त्तिकमिभ्रमीति ।" उणां ३ । १३२ । इति अरः ।) पत्युः कनिष्ठभ्राता । देओर इति भाषा । ("देवरः कस्मात् द्वितीयो वर उच्यते ।" इति निरुक्तेः । ३ । १५ ॥) तत्पर्य्यायः । देवा २ । इत्यमरः । २ । ६ । ३२ ॥ देवृः ३ देवारः ४ देवानः ५ । इति जटाधरः ॥ तुरागावः ६ देवली ७ । इति शब्दरत्नावली ॥ (यथा, मनुः । ९ । ५९ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥")
पत्युर्ज्येष्ठो भ्राता तु श्वशुरः । इति भरतः ॥